योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०५१

एकपञ्चाशः सर्गः ५१

श्रीराम उवाच ।

कथं केवलजाग्रत्त्वमकारणमनर्थकम् ।

पराद्विकसति ब्रह्मन्गगनादिव पादपः ।। १

श्रीवसिष्ठ उवाच ।

अकारणं महाबुद्धे न कार्यमुपलभ्यते ।

तज्जाग्रतः केवलस्य न कश्चिदिह संभवः ।। २

तस्यातो संभवादन्ये जीवभेदाः सजीवकाः ।

सर्वे न संभवन्त्येव कारणाभावविक्षताः ।। ३

नेह प्रजायते किंचिन्नेह किंचन नश्यति ।

उपदेश्योपदेशार्थं शब्दार्थकलनोदयः ।। ४

श्रीराम उवाच ।

कः करोति शरीराणि मनोबुद्ध्यादिचेतनैः ।

को मोहयति भूतानि स्नेहरागादिबन्धनैः ।। ५

श्रीवसिष्ठ उवाच ।

न कश्चिदेव कुरुते शरीराणि कदाचन ।

न मोहयति भूतानि कश्चिदेव कदाचन ।। ६

अनाद्यन्तावभासात्मा बोध आत्मनि संस्थितः ।

नानापदार्थरूपेण कमूर्म्यादितया यथा ।। ७

बाह्यं न विद्यते किंचिद्बोधः स्फुरति बाह्यवत् ।

उदेति बोधहृदयाद्बीजादिव वरद्रुमः ।। ८

बोधस्यान्तरिदं विश्वं स्थितमेव रघूद्वह ।

स्तम्भस्यान्तर्यथा शालभञ्जिका प्रकटीकृता ।। ९

सबाह्याभ्यन्तरात्मैकमनन्तं देशकालतः ।

बोधामोदप्रसरणं जगदेव प्रबुध्यताम् ।। १०

अयमेव परो लोको भाव्यतां वासनाक्षयः ।

शाम्यतां परलोकस्थं काः किलायान्ति वासनाः।। ११

देशकालक्रियालोकरूपचित्तात्मसत्पदम् ।

देशकालादिशब्दार्थरहितं न च शून्यकम् ।। १२

पदे पदविदामेव तस्मिन्बोधगतिर्भवेत् ।

द्रष्ट्रणां शान्तदृश्यानामेवान्येषां न राघव ।। १३

ये वै तरलगम्भीरमहंतागर्तमाश्रिताः ।

पश्यन्ति ते तमालोकं न कदाचन केचन ।। १४

चतुर्दशविधानन्तभूतजातसुघुंघुमा ।

जगद्दृष्टिरियं ज्ञस्य शरीरावयवोपमा ।। १५

कारणाभावतः सृष्टिर्नोदिता न च शाम्यति ।

यादृशं कारणं वा स्यात्तादृग्भवति कार्यकम् ।। १६

यदि स्यात्कारणे कार्यं स्थितं कारणतास्य का ।

कार्यमेवोपलम्भात्तदसद्द्वयमवेदनात् ।। १७

सौम्यस्यान्तर्यथाम्भोधेरूर्म्यावर्तादयः स्थिताः ।

ब्रह्मण्यसंभवक्षोभे जगच्चित्तादयस्तथा ।। १८

सर्वात्मैवामलं ब्रह्म पिण्ड एक इव स्थितम् ।

नानाभाण्डात्म हेमैव यथान्तःस्थितरूपकम् ।। १९

स्वप्नकाले स्वप्न एव जाग्रद्व्यग्रापरिग्रहात् ।

जाग्रत्काले जाग्रदेव स्वप्नः सत्यावबोधतः ।। २०

चित्तमात्रतया बुद्धं मृगतृष्णाम्बुवत्स्थितम् ।

जाग्रत्स्वप्नत्वमायाति विचारविकलीकृतम् ।। २१

सम्यग्ज्ञानेन भूतानि ज्ञस्य देहतया सह ।

पीठबन्धं विमुञ्चन्ति गतकाल इवाम्बुदाः ।। २२

यथा गलितुमारब्धो घनो गगनतामियात् ।

तथा सत्यावबोधेन शाम्येत्सात्मग्रहं जगत् ।। २३

शरदभ्रवदालूना मृगतृष्णाम्बुवृत्तथा ।

पुनः संस्पृश्यमानैव बोधाद्गलति दृश्यता ।। २४

यथा दीप्तानले लीनं सुवर्णं घृतमिन्धनम् ।

एकतां याति विज्ञाने तथा भुवनचित्तदृक् ।। २५

बोधेन तनुतामेति पिण्डबन्धो जगत्त्रये ।

पिशाचबुद्धिः सदने बोधितस्य यथा शिशोः ।। २६

बोधस्यानन्तरूपस्य स्वयमेवात्मनात्मनि ।

जगच्चित्तादिता भाता पिण्डबन्धः किलात्र कः ।।२७

बोधाबोधनमेवेदं जगच्चित्तमिवोदितम् ।

तदेवास्तं गतं बोधात्पिण्डबन्धस्य कास्तिता ।। २८

जहाति पिण्डकाठिन्यं जाग्रत्स्वप्नावबोधतः ।

परां पेलवतामेति हेम द्रुतमिवाग्निना ।। २९

यथास्थितं बोध एव घनतामिव गच्छति ।

विनैव देशकालाभ्यां तौ विनिर्माय हेमवत् ।। ३०

जाग्रत्येवं विचारेण स्वप्नाभे पेलवे स्थिते ।

क्षीयमाणे शरत्काल इवैति तनुतां रसः ।। ३१

परां पेलवतां याता दृश्यलक्ष्म्यः स्थिता अपि ।

स्वप्ना इव परिज्ञाता न स्वदन्ते विवेकिनः ।। ३२

क्व किल स्वात्मविश्रान्तिः क्वैतद्विषयवेदनम् ।

सुषुप्तजाग्रतोरैक्यं भ्रान्ताभ्रान्तात्मनोर्भवेत् ।। ३३

चित्तमात्रे भ्रान्तिमात्रे स्वप्नमात्रात्मनि स्थिते ।

जगतीह पदार्थेभ्यः सत्यबुद्धिर्निवर्तते ।। ३४

कस्य स्वदन्तेऽसत्यानि कथमेव महामते ।

मृगतृष्णाजलानीव दृश्यान्यपि पुरःस्थितैः ।। ३५

सत्यबुद्धौ विलीनायां जगत्पश्यति शान्तधीः ।

जालद्वीपांशुजालाभमपिण्डात्माम्बरात्मकम् ।। ३६

जाग्रतो वस्तुतः शून्यात्परिज्ञातान्निवर्तते ।

चित्तभ्रमात्मनो भ्रान्तिरूपास्वादनभावना ।। ३७

यदवस्त्विति विज्ञातं तत्रोपादेयता कुतः ।

केन स्वप्नं परिज्ञाय स्वप्नहेमाभिगम्यते ।। ३८

स्वप्नादिव परिज्ञाताद्रसो दृश्यान्निवर्तते ।

द्रष्टृदृश्यदशादोषग्रन्थिच्छेदः प्रवर्तते ।। ३९

नीरसः शान्तमननो निर्वाणाहंकृतिः कृती ।

वीतरागो निरायासः शान्तस्तिष्ठति बुद्धधीः ।। ४०

रसे नीरसतां याते वासना प्रविलीयते ।

शिखायां प्रविलीनायां प्रदीपस्यांशवो यथा ।। ४१

बोधाद्दीपांशुजालाभमघनं व्योम दृश्यते ।

भ्रान्तिरूपं जगत्कृत्स्नं गन्धर्वनगरं यथा ।। ४२

नैवात्मानं न चाकाशं न शून्यं न च वेदनम् ।

अत्यन्तपरिणामेन पश्यन्पश्यति तत्पदम् ।। ४३

यत्र नात्मा न शून्यं च न जगत्कलना न च ।

न चित्तदृश्योदयधीः सर्वं चास्ति यथास्थितम् ।।४४

भूम्यादिताऽज्ञसंबुद्धा ज्ञानादस्तमुपागता ।

ज्ञस्य शून्यैव संपन्ना संस्थितापि न विद्यते ।। ४५

भवत्येकसमाधानसौम्यात्मा व्योमनिर्मलः ।

तिष्ठत्यपगतासङ्गः स्थित एवाप्यसत्समः ।। ४६

अस्तंगतमना मौनी निरोधपदवीं गतः ।

तीर्णः संसारजलधेः कर्मणामन्तमागतः ।। ४७

तनुभुवनगगनगिरिगण-

करणपरं परममज्ञानम् ।

विगलति गलिते तस्मिन्

सकलमिदं विद्यमानमपि ।। ४८

संशान्तान्तःकरणो

गलितविकल्पः स्वरूपसारमयः ।

परमशमामृततृप्त-

स्तिष्ठति विद्वान्निरावरणः ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे०मोक्षोपायेषु निर्वाणप्रकरणे उ० विश्रान्तियोगोपदेशो नामैकपञ्चाशः सर्गः ।। ५१ ।।